# Vibhishanakritam Rameshvara Stotram

# विभीषणकृतं रामेश्वरस्तोत्रम्

## Document Information

Text title : Vibhishanakritam Rameshvara Stotram

File name : vibhIShaNakRRitaMrAmeshvarastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 104/44-52||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 24, 2025

*sanskritdocuments.org*

# विभीषणकृतं रामेश्वरस्तोत्रम्

(रामेश्वर लिङ्ग)
नमस्ते देवदेवेश भक्तानामभयप्रद ।
सर्वतः पाणिपादं ते सर्वतोऽक्षिशिरोमुखम् ॥ ४४॥

त्वं यज्ञस्त्वं वषट्कारस्त्वं चन्द्रस्त्वं प्रभाकरः ।
त्वं विष्णुस्त्वं चतुर्वक्त्रः शक्रस्त्वं परमेश्वरः ॥ ४५॥

यथा तिलगतं तैलं गूढं तिष्ठति सर्वदा ।
तथा त्वं सर्व लोकेषु गूढस्तिष्ठसि शङ्कर ॥ ४६॥

यथा काष्ठगतो वह्निः संस्थितोऽपि न लक्ष्यते ।
मूढैः सर्वत्र संस्थोऽपि तथा त्वं नैव लक्ष्यसे ॥ ४७॥

यथा दधिगतं सर्पिर्निगूढत्वेन संस्थितम् ।
चराचरेषु भूतेषु तथा त्वं देव संस्थितः ॥ ४८॥

यथा जलं धरापृष्ठात्खनन्नाप्नोति मानवः ।
तथा त्वां पूजयन्नित्यं मोक्षमाप्नोत्यसंशयम् ॥ ४९॥

तावच्च दुर्लभः स्वर्गस्तावच्छूराश्च शत्रवः ।
यावदेव न सन्तोषं त्वं करोषि शरीरिणाम् ॥ ५०॥

तावल्लक्ष्मीश्चला नृणां तावद्रोगाः पृथग्विधाः ।
न यावद्देवदेव त्वं सन्तोषं सम्प्रयास्यसि ॥ ५१॥

तावत्पुत्रोद्भवं दुःखं तथा प्रियसमुद्भवम् ।
यावत्त्वं देव नायासि सन्तोषं देहिनामिह ॥ ५२॥

इति श्रीस्कन्दपुराणे नागरखण्डे चतुरधिकशततमाध्यायान्तर्गतं
विभीषणकृतं रामेश्वरस्तोत्रं समाप्तम् ।

स्कन्दपुराण । नागरखण्ड । अध्याय १०४/४४-५२॥

skandapurANa . nAgarakhaNDa . adhyAya 104/44-52..

Proofread by PSA Easwaran

*Vibhishanakritam Rameshvara Stotram*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*